Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(1), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.08.20.3.1.13
www.ijmer.in

श्रीपाञ्चरात्रे भारद्वाजसंहितानुसारं जलाधिवासस्वरूपनिरूपणम्

Dr. Lakshmi Rajesh
Research Scholar,Department of Aagama
National Sanskrit University
Tirupati

ओं इत्येकाक्षरं आत्मनो मोक्षाय जगतः हिताय इति पारमात्मिकतत्त्वप्रबोधकस्यास्य वेदराशेः मूलमिति लोके विद्वज्जनाः उररीकुर्वन्ति। **वेदोऽखिलो धर्ममूलमिति जगत्** इति प्रमाणमनुसृत्य सकलधर्माणां मूलभूतः वेदः एव। परं तत्र धर्मशब्दस्य **सः धर्मस्सनातनः** इत्यादि वाक्यैः प्रमाणभूतः परमात्मा एव विज्ञायते। सनातनधर्मस्वरूपस्य परमात्मनः सुसायुज्य सम्पादनार्थं आचर्यमाणा उपासनाविधिरपि धर्मशब्देनैव उदाह्रियते। अत एव वेदः पूर्वार्ध, उत्तरार्ध भेदेन द्विधा विभक्तो वर्तते। पूर्वार्धे हि उपासना प्रमाणानि उदाहरति। उत्तरार्धं हि परमात्मनः स्वरूपम्, जीवात्मनः स्वरूपं तयोः सम्बन्धश्च व्यनक्ति। अत एव प्राप्यधर्मः उत्तरार्धमिति प्रापकधर्मः पूर्वार्धमिति च भण्यते। **वेदैश्च सर्वैरहमेव वेद्यः** इति हि भगवतः वचनम्। स एव देव देवर्षि, महर्षिभिः स्वानुष्ठानपरं शास्त्रमेकं आविर्भावमकरोत्। तच्च सात्त्वत शास्त्रमिति, आगमशास्त्रमिति च व्यवहारः अस्मिन् लोके।

पुरुषोत्तमसंहितानुसारं आगमोनाम भगवतः अर्चनादिकमनु भगवतः प्राप्तिपूर्तिः एवं तत्प्रभाव सम्पादनमेव भवति। तद्यथा -

आचारकथनाद्दिव्यगतिप्राप्तिविधानतः।
माहात्म्यतत्त्वकथनात् आगमश्चेति गण्यते।।[1] इति

नामक ग्रन्थे वासुदेवमुद्दिश्य शिववक्त्रेभ्यो यदागतं गिरिजायाः श्रुतौ यद्वागतं भगवतः मतं यतत् आगमशब्देन परिकीर्त्यते। तद्यथा -

आगतं शिववक्त्रेभ्यो गतं च गिरिजा श्रुतौ।
मतं च वासुदेवस्य तस्मादागममुच्यते ।। इति।

आगमो नाम भगवतः स्वरूपनिरूपणमेवेति ज्ञायते। वस्तुतः आलोच्यमाने आगमशास्त्रं न केवलं भगवतः स्वरूपं वर्णयति नाऽपि मोक्षाधिकारं सम्पादयति परं देवालय -निर्माणम्, ग्रामनिर्माणम्, विग्रहनिर्माणम्, प्रतिष्ठाविधिः नित्यनैमित्तिककाम्योत्सवादि सर्वविधविधानानि परिकल्पयति। आगमाः द्विविधाः वैदिकाः अवैदिकाश्चेति। वेदप्रमाण्यं ये अङ्गीकुर्वन्ति ते वैदिकाः, वेदप्रमाण्यं नाङ्गीकुर्वन्ति ते अवैदिकाः इति व्यवहारः। आगमाः वैष्णवशैवशाक्तेयादि भेदेन भिद्यन्ते। एतेषु विष्णुपारम्ययुताः वैष्णवागमाः, शिवपारम्यं प्रबोधयन्ति शैवागमाः, शाक्तागमाः शक्तेः परम्यं समुद्बोधयन्ति। वैष्णवागमः श्रीपाञ्चरात्र -वैखानस भेदेन भिद्यते।

भगवतः श्रीमन्नारायणस्याराधनार्थमाविर्भूतेषु आगमेष्वमन्यतमः पाञ्चरात्रागमः। तर्क -वाचस्पत्यम्, तन्त्रवार्तिकम् शतपथब्राह्मणम्, छान्दोग्योपनिषद्, पुरुषोत्तमसंहिता ईश्वर, श्रीप्र -श्नसंहिता, श्रीमन्महाभारतमित्यादौ पाञ्चरात्रशब्दः विशेषतया वर्णिताः।

आगमशास्त्रस्य प्रधानोद्देश्यं मोक्षप्राप्तिः अथवा मोक्षसम्पादनम्। तच्च पाञ्चरात्रागमेन अवश्यं साधयितुं शक्नुमः।

श्रीपाञ्चरात्रागमे कर्षणादिप्रतिष्ठान्तं सर्वे विषयाः प्रतिपाद्यते। परं पराशरसंहिता, भारद्वाजसंहिता इत्येतौ द्वावपि कर्षणादिप्रतिष्ठान्तं तथा प्रपत्तिसम्बद्धस्वरूपं च विशेषेण प्रतिपादयतः। एतौ द्वावपि सात्विकसंहितासु मुनिभाषितेष्वन्तर्भूतः। अनयोर्मध्ये भारद्वाज-संहिता स्पष्टतया

[1] पु. सं .1 . 3

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(1), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.08.20.3.1.13
www.ijmer.in

प्रतिष्ठान्तम्, प्रपत्तिश्च सम्यक् वर्ण्यते। सर्वेष्वागमेषु इयं भगरद्वाजसंहिता अन्यतमत्वेन विराजते। अस्यां संहितायां कर्षणादिप्रतिष्ठान्तं सर्वे विषयाः सुष्ठु व्याख्याताः।

भारद्वाजसंहिता प्रस्तावः एवं कालनिर्णयनश्च

भारद्वाजसंहितायाः प्रस्तावः कपिञ्जलपाद्मविष्णुपुरुषोत्तमविश्वामित्रमार्कण्डेयपारमेश्वर- संहितासु दृश्यते। भारद्वाजसंहिता प्रायः क्रि.श.800शताब्दात् पूर्वमेवेति DR. डेनियल् स्मित् इत्याद्याङ्ग्लपरिशोधकानामाङ्ग्लपरिशोधकस्य मतम्। परमस्य विकासः आन्ध्रनिवसितानां श्रीपाञ्चरात्रशास्त्रविशारदानां श्रीमतां रेजेटि वेणुगोपालाचार्यमहोदयानां अनुकम्पया सुस्पष्ट -परिश्रमेण च सञ्जातः।

भारद्वाजसंहिता

संहितायामस्यामेकादशाध्यायाः सन्ति। प्रथमोऽध्याये पाञ्चरातत्रप्रभेदाः वर्णिताः, द्वितीये अध्याये शास्त्रावतरणम्, तृतीये अध्याये आचार्यवरणम्, चतुर्थो अध्याये जलाधिवासः पञ्चमे अध्याये धन्याधिवासः, षष्ठे अध्याये प्रतिष्ठाविधिः, सप्तमे अध्याये विवाहानुक्रमः, अष्टमोऽध्याये विमानगोपुरादीनां प्रतिष्ठा, नवमाध्याये नित्यार्चनविधिः, दशमोऽध्याये तुलसी -पूजाकल्पः, एकादशाध्याये पञ्चबेरविशेषाः, तण्डुलप्रमाणम्, गोपुरप्रतिष्ठा, शान्तिहोमादयः सुष्ठु वर्णिताः।

भारद्वाजसंहितायां जलाधिवासः

संहितायामस्यां जलाधिवासो अत्यन्तस्पष्टतया वर्णितः। तद्यथा प्रतिष्ठाकाले बिम्बशक्तेः अभिवृद्धये जलाधिवासादिक्रियाः क्रियन्ते। आदावाचार्यः रङ्गवल्लीभिरलंकृतं यागमण्डपं प्रविश्याष्टदलपद्मं विलिखेत्। पालिकादीन् संस्थाप्यप्याङ्कुरार्पणं समाचरेत्। शङ्खनिस्वानैः शुचि -र्भूत्वा ब्राह्मणादिभिः सह मङ्गलवाद्यतूरीयघोषसमन्वितः नृत्तगीतवेदपठनपुरस्सरं छत्रचामर -भूषणैः शोभायमानमलंकृतं भगवन्तं समादाय यागवेद्यां प्रविशेत्। रक्षार्थं सूतकशौचवर्जनार्थं प्रतिसरबन्धं धारयेत्।(कारयेद्देशिकः) तदुक्तम्-

चामीकरे तु रक्षार्थं कङ्कणे धारयेद्बुधः।
कर्मणां रक्षणार्थाय ध्यानस्य विजयाय च।।
रक्षाबन्धस्तु कर्तव्यः सूतशौच वर्जने।
रकारं रमते पूंसां क्षकारं क्षेममेव च।।
रेफाक्षर योगेन रक्षाबन्धनमुच्यते।[2] इति।

एवञ्च लोकक्षेमार्थं ग्रामक्षेमार्थं कार्यक्षेमार्थं च कौतुकं बन्धरयेत्। तच्च प्रतिसरबन्धः महेन्द्रस्य वज्रायुधमिव, पिनाकिनः हस्तस्थशूलमिव विष्णोः सुदर्शनमिवास्मान् त्रायते। यथोक्तम्- **यथा सुदर्शनं विष्णोः यथा शूलं पिनाकिनः।**

यथा वज्रं महेन्द्रस्य तथा विप्रकरे कुशः।।[3] इति

विप्रकरे विद्यमानं कुशं दृष्ट्वा भूतप्रेतपिशाचदयः, क्रूराः, ब्रह्मराक्षसाश्चाधोमुखं गच्छन्ति। अतः
अवश्यं कर्मणां रक्षार्थमाचार्यः ऋत्विग्भिः सह कौतुकं धारयेत्। आचार्यः नान्दीमुखी देवताह्वानं च समाचरेत्। ततः वास्तुपूजां यथाविधि निर्वर्त्य जलाधिवासं समाचरेत्।

जलाधिवासे आचार्यः भगवतः प्रीत्यर्थं जलाधिवासयोग्यतासिध्यर्थं, पञ्चामृतस्नानं, परिमलतैलाज्यसुगन्धचूर्णै इति सङ्कल्पयेत्। जलाधिवासार्थं नवद्रोणिपरिमित धान्यराश्योपरि द्वादशकलशान् संस्थाप्य तन्मध्ये ब्रह्मकलशम्, पार्श्वे धान्यकलशम्, तदुत्तरे विष्वक्सेन-कलशम्,

[2] भा-सं -43, 47.48 4अध्या

[3] भा-सं- 43.78

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(1), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.08.20.3.1.13
www.ijmer.in

उपब्रह्मकलशम्, परितः अष्टदिक्षु अष्टकलशानि संस्थाप्य, तेषु शुद्धोदकचूतपल्लव -गन्धपुष्पैः प्रपूर्य वस्त्रमाच्छाद्याधिदेवतानावह्य इममेगङ्गेति मन्त्रैः कलशान् अभिमन्त्रयेत्। तदनु कलशेषु पञ्चगव्यैः संप्रोक्ष्य तत्तन्मन्त्रैः प्रपूजयेत्। तदनु देशिकः शान्तिशाकुनासूक्तैः भगवन्तं देवीभ्यां सह ध्रुवन्तेति मन्त्रेण प्राक्छिरसं भगवन्तं शाययित्वा तत्वसंहारक्रमेण विर्वर्तयेत्। देशिकः गर्भगेहे भगवत्प्रतिष्ठासिध्यर्थं जलाधिवासहोमं सङ्कल्प्य सुशोभायन-मलंकृतं यागशालं प्रविश्य अग्न्याधानार्थं अग्निं ध्यात्वा विष्णोर्नुकमिति मन्त्रेण समिदाज्यचरुणा एकाशीतिवारं पञ्चगव्यमन्त्रैः जुहूयात्।

ततः आचार्यः महाव्याहृति होमं आचरन् ततः पावमानद्यैः विविध सूक्तैः शुद्धोदकैः आवाहित कुम्भतोयैः पञ्चामृतैः पञ्चगव्यैश्च अभिषेकोत्सवः अर्थात् जलाधिवासः निर्वर्तयेत्। ततः जलादुत्थाय देवेशंदी शुचौ देशे विनिवेशयेद्दशिकः।

एवंरित्या जलाधिवासक्रमः भारद्वाज सहितायां सुष्ठु निरूपितः।

उपयुक्तग्रन्थसूची

1. श्री पाञ्चरात्रागमसंहिता प्रमाणपदकोशः, श्रीमान् डा कण्डलकूण्ट कोदण्डरामाचार्युलु, विजयवाटिका
2. भारद्वाजसंहिता - श्रीमान् डा रेजेटि तोट्टर् वेणुगोपालाचार्यः, राजमहेंद्रवरम्
3. भगवत्प्रतिष्ठाविधानम् - श्रीमान् श्रीपेरूंबुदूरु राघवाचार्यः - नल्लगोण्डा